# बोर्ड कृतिपत्रिका : मार्च २०१९

## आमोदः (सम्पूर्ण-संस्कृतम्)





**अवधिः होरात्रयम्** | **गुणाङ्काः १००**


**सूचनाः**

1. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
2. यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।
3. आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।

### प्रथमः विभागः- सुगमसंस्कृतम्। (15)

**1. अ. चित्रं दृष्ट्वा नामानि लिखत। (5 तः 4)** 4

1) 
2) 
3) 
4) 

5) 

**आ. सङ्ख्याः अक्षरैः / अङ्कैः लिखत। (3 तः 2)** 2

1. ९१  2. सप्तत्रिंशत्  3. ४८

**इ. समय-स्तम्भमेलनं कुरुत।** 2

| क्र. | अ | आ |
|---|---|---|
| 1. | सपाद - चतुर्वादनम् | ८.२५ |
| 2. | पञ्चविंशत्यधिक-अष्टवादनम् | १२.३० |
| 3. | दशोन-नववादनम् | ४.१५ |
| 4. | सार्ध-द्वादशवादनम् | ८.५० |

**ई. वासर–तालिकां पूरयत। (3 तः 2)** 2

| --------- सोमवासरः | ← ह्यः मङ्गलवासरः | ← --------- बुधवासरः | → श्वः --------- |
|---|---|---|---|

**उ. उदाहरणद्वयं लिखत। (6 तः 5)** 5

1. मूर्धन्यौ।  2. अनुनासिकौ।
3. सकारान्तस्य नामद्वयम्।  4. स्त्रीलिङ्गस्य नामद्वयम्।
5. दशमगणस्य धातुद्वयम्।  6. परस्मैपदस्य धातुद्वयम्।

COEPian's ACADEMY™ We are a 'class' apart...

### द्वितीयः विभागः- गद्यम्। (22)

**2. अ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [7]

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत्। भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च। ताः प्रजाः पशुवज्जीवन्ति। निकृष्टान्नं खादन्ति। तद् दृष्ट्वा राजा चिन्ताकुलः जातः। तदा पुरोहितोऽवदत्, "हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते। तत्प्राप्तुं यतस्व।"

तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, "हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि। त्वं तु प्रजाहितदक्षः नृपः। यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज। खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।"

**1. अवबोधनम्। (4 त: 3)** **3**

क. उचितं कारणं चित्वा वाक्यं पुनर्लिखत। **1**

भूम्या धनधान्यपुष्पफलानि स्व-उदरे निहितानि यत: ............

1. वेनभूप: दु:शासक: आसीत्।
2. भूमि: स्वभावेन कृपणा आसीत्।

ख. क: कं वदति? **1**

तव पिता दु:शासक:।

ग. पूर्णवाक्येन उत्तरं लिखत। **1**

वसुन्धराया: उदरे किं वर्तते?

घ. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। **1**

वेनराज: राजधर्मस्य पालनम् अकरोत्।

**2. शब्दज्ञानम्। (3 त: 2)** **2**

क. 2 पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये चित्वा लिखत। **1**

ख. गद्यांशात् विशेषणं चित्वा लिखत।

1. .......................... प्रजा:। 2. .......................... नृप:।

ग. पूर्वपदं लिखत। **1**

1. पुरोहितोऽवदत् = ........................ + अवदत्।
2. अशक्ताश्च = .......................... + च।

**3. पृथक्करणम्।**

**क. क्रमेण योजयत।** **2**

1. भूमे: कृषिकार्यस्य उपदेशनम्।
2. पृथुभूपस्य धनु: सज्जीकरणम्।
3. पुरोहितस्य उपदेशकथनम्।
4. भूमे: स्त्रीरूपं धृत्वा प्रकटनम्।

**आ. गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** [7]

अथ प्राप्त: सुदासस्तदुद्यानं, यत्र भगवत: सुगतस्य निवास:। तत्र वटवृक्षस्याधस्तादेकस्मिन्नश्मखण्डे समुपविष्ट आसीत् महात्मा। अनलेन धाम्ना राजते स्म तस्य भगवतो वदनम्। तदालोकयत: सुदासस्य चित्ते भक्तिरसार्णव उदतिष्ठत्। स हस्तस्थं नीरजं भगवत: सुगतस्य चरणयोरर्घ्यं कृत्वा 'नमो भगवते' इति वदन् सविनयं प्राणमत्।

COEPian's ACADEMY™ We are a 'class apart...

तं प्रसादवर्षिभ्यां लोचनाभ्यां निरूपयन् स्मयमानमुखपद्मो भगवान् अभाषत, "वत्स, किमिच्छसि?" इति। एवम् उक्तवति सुगते निरिच्छ: सुदास: प्रत्यवदत् "भगवन् किमन्यत्? केवलं भगवत: चरणकमलस्पर्शेन आत्मा मे कृतार्थतां लभताम्" इति।

एवंवादिनं सुदासं 'तथास्तु' इत्यब्रवीद् भगवान् सुगत:। अहो प्रभाव: सुगतस्य, यत्तस्य दर्शनमात्रेणैव कमलार्थं बहुमूल्यमपेक्षमाण: सुदासस्तद्विस्मृत्य सुगतचरणाभ्यां तत्कमलं समर्पितवान्।

एष सुगत: एव ननु भगवान् गौतमबुद्ध:।

**1. अवबोधनम्। (4 त: 3)** **3**

क. उचितं कारणं चित्वा वाक्यं पुनर्लिखत। **1**

सुदास: नीरजं सुगतचरणाभ्यां समर्पितवान् यत: ........................

1. सुगत: सुदासाय अधिकं धनं यच्छति।
2. सुदासस्य मनसि भक्तिरस: अजायत।

ख. पूर्णवाक्येन उत्तरं लिखत। **1**

क: सुगत: ?

ग. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। **1**

'तथास्तु' इत्यब्रवीत् सुदास:।

घ. एष: गद्यांश: कस्मात् पाठात् उद्धृत:? **1**

**2. शब्दज्ञानम्। (3 त: 2)** **2**

क. प्रश्ननिर्माणं कुरुत।

भगवतो वदनं <u>धाम्ना</u> राजते स्म।

ख. उत्तरपदं लिखत। **1**

i. चरणयोरर्घ्यम् = चरणयो: + ..........................।


ii. किमिच्छसि = किम् +..........................।

ग. लकारं लिखत। **1**

आत्मा मे कृतार्थतां <u>लभताम्</u> ।

**3. पृथक्करणम्।** **2**

**स्थानाधारेण शब्दपेटिकां पूरयत।**



**(मञ्जूषा – वटवृक्ष:, नगरम्, अश्मखण्ड:, उद्यानम्)**

COEPian's ACADEMY™
We are a 'class' apart...

**इ. गद्यांशं पठित्वा सरलार्थं लिखत। (2 त: 1)** **[4]**

1.

| | | |
|---|---|---|
| रदनिका | – | एहि वत्स! शकटिकया क्रीडाव:। |
| दारक: | – | (सकरुणम्) रदनिके! किं मम एतया मृत्तिकाशकटिकया; तामेव सौवर्णशकटिकां देहि। |
| रदनिका | – | (सनिर्वेदं नि:श्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहार:? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि। (स्वगतम्) तद्यावद्विनोदयाम्येनम्। |

2.

| | | |
|---|---|---|
| विश्वामित्र: | – | अयि मात:, विश्वामित्रोऽहम्। दूरत: आयात: रथै: शकटै: च। वयं सर्वे परतीरं गन्तुं समुत्सुका:। |
| नदी (शुतुद्री) | – | विप्रवर, मधुरा खलु ते वाणी। रञ्जयति अस्मान्। वद कथं तव साहाय्यं कर्तव्यम्? |
| विश्वामित्र: | – | अम्ब, शृणु मे अभ्यर्थनाम्। |

**ई. माध्यमभाषया उत्तरं लिखत। (3 त: 2)** **[4]**

1. सर्कसस्वामी किमर्थं चिमणरावं प्रति आगत:?
2. महर्षि: कणाद: परमाणुविषये किं प्रतिपादितवान्?
3. शङ्करेण संन्यासार्थं कथम् अनुमति: लब्धा?

## तृतीयः विभागः- पद्यम्। (20)

**3. अ. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [4]

१. रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः
निरालम्बो मार्गश्चरणविकलः सारथिरपि।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।।

२. तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे।
निरैक्षद् रावणं क्षिप्रं वैदेहीं च ददर्श सः।।
ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।


**1. पूर्णवाक्येन उत्तरं लिखत।** 1

रवेः सारथिः कीदृशः अस्ति?

**2. विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| क्र. | अ | आ |
|---|---|---|
| 1. | निरालम्बः | तुरगाः। |
| 2. | सप्त | मार्गः। |
| | | चक्रम्। |

**3. पद्यांशात् विशेषणानि चित्वा रेखाचित्रं पूरयत।** 2




**आ. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [4]

अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि।
धनं जनेभ्यः किल याचतेऽयं
न याचको वा न च निर्धनो वा।।
वैद्यराज नमस्तुभ्यं यमराजसहोदर।
यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च।।
यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम्।।

COEPian's ACADEMY™
We are a 'class' apart...

**1. पूर्णवाक्येन उत्तरं लिखत।** 1

'अयं न भक्तो' इति प्रहेलिकायाः उत्तरं किम्?

**2. उत्तरपदं लिखत।** 1

नमस्तुभ्यम् = नमः + _______ ।        वाऽपि = वा + _______ ।

**3. माध्यमभाषया उत्तरं लिखत। (2 तः 1)** 2

क. 'वैद्यराज नमस्तुभ्यम्' अस्य श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत।

ख. मनुष्यः स्वकर्मणः कीदृशं फलं लभते?

**इ. पद्ये शुद्धे पूर्णे च लिखत। (क, ख तः 1, ग, घ तः 1)** [6]

क. विद्या नाम ..............................
......................विद्याविहीनः पशुः।।

**अथवा**

ख. यदा किञ्चिज्ज्ञोऽहं..............................
..............................मे व्यपगतः।।

क. राक्षसेभ्यः ..............................
.............................. स पण्डितः

**अथवा**

ख. आत्मनोः..............................
.............................. सर्वार्थसाधनम्।।

**ई. अन्वयं पूरयत।** [2]

पुरुष: ________ भिन्द्यात् ________ छिन्द्यात् रासभरोहणं (अपि) कुर्यात्। येन केन ________ (स:) ________ भवेत्।

**उ. सरलार्थं लिखत। (3 त: 2)** [4]

1. मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुता:।। **2**

2. षड्जमूला यथा सर्वे सङ्गीते विविधा: स्वरा:।
तथा मानवताधर्मं सर्वे धर्मा: समाश्रिता:। **2**

3 वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्।
वार्धक्ये दु:खहरणं हितं सद्ग्रन्थवाचनम्।। **2**

## चतुर्थ: विभाग:- लेखनकौशलम्। (15)

**4. अ. वाक्यरचनां कुरुत।** [5]

**1. धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (5 त: 3)** **3**

क. याच् (1 आ.प.) ख. कुप् (4 प.प.) ग. वि + रम् (1 प.प.)

घ. स्पृह् (10 उ.प.) ङ् स्निह् (4 प.प.)

**2. अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत। (4 त: 2)** **2**

क. रवि: अपारनभस: पारं याति। ख. कृष्ण: मेघ: जलं वर्षति।

ग. जनै: कनकं परीक्ष्यते। घ. जम्बूक: तेन सह मृहस्य निवासस्थानं गत:।

**आ. 5/7 वाक्यात्मकं निबन्धं लिखत। (3 त: 1)** [5]

1. मम प्रिय: उत्सव:। 2. मम प्रिया भाषा। 3. मम प्रिय: नेता।


COEPian's ACADEMY™
We are a 'class' apart...

**अथवा**

**आ. 5/7 वाक्यात्मकं संवादं लिखत। (3 त: 1)** [5]

1. आपणसंवाद:। 2. गृहसंवाद:। 3. दूरवाणीसंवाद:।

**इ. मञ्जूषात: उचितशब्दान् चित्वा 5-6 वाक्यात्मकं चित्रवर्णनं कुरुत।** [5]




(मञ्जूषा- पश्यति, उपविशति, क्रीडति, दोलयति, अवसर्पति, भ्रमति, क्षिपति)

**अथवा**

**संस्कृतानुवादं कुरुत। (8 त: 5)** **5**

1. मी डोळ्यांनी पाहतो/पाहते.
   I see with eyes.
   मैं आँखों से देखता/देखती हूँ।

2. गाढव ओझे वाहते.
   A donkey carries the burden.
   गधा बोझ ढोता है।

3. कार्तिकेय गणेशाचा भाऊ आहे.
   Kartikeya is brother of Ganesha.
   कार्तिकेय गणेश का भाई है।

4. 2 मुली मैदानावर खेळतात.
   2 girls play in the playground.
   2 लड़कियाँ मैदान में खेलती हैं।

5. शिक्षक विद्यार्थ्याबरोबर मंदिरात जातो.
   A teacher goes to the temple with a student.
   गुरु छात्र के साथ मंदिर जाता है।

6. माणसाने कधीही खोटे बोलू नये.
   A man should never speak a lie.
   मनुष्य को कभी झूठ नहीं बोलना चाहिए।

7. पावसाळ्यात मोर आनंदाने नाचतात.
   Peacocks dance happily in the rainy season.
   बारिश में मोर खुशी से नाचते हैं।

8. तू प्रश्न विचारतोस आणि उत्तर लिहितोस.
   You are asking a question and writing the answer.
   तुम प्रश्न पूछते/पूछती हो और उत्तर लिखते/लिखती हो।

## पञ्चमः विभागः- भाषाभ्यासः

**(20)**

**5. अ. तालिकापूर्तिं कुरुत।** **[8]**

1. **नामतालिका। (6 त: 4)** **2**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| भाषया | ________ | ________ | तृतीया |
| ________ | शशिनोः | ________ | सप्तमी |
| ________ | ________ | वाचाम् | षष्ठी |

COEPian's ACADEMY™
We are a 'class' apart...

2. **सर्वनामतालिका। (6 त: 4)** **2**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| कस्याः | ________ | ________ | षष्ठी |
| ________ | युवाभ्याम् | ________ | पञ्चमी |
| ________ | ________ | सर्वाणि | द्वितीया |

3. **क्रियापदतालिका। (6 त: 4)** **2**

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लट् | ________ | ________ | मन्यन्ते | प्रथमः पुरुषः |
| लोट् | पूजय | ________ | ________ | मध्यमः पुरुषः |
| लृट् | ________ | भविष्यावः | ________ | उत्तमः पुरुषः |

4. **धातुसाधित-विशेषण-तालिका। (6 त: 4)** **2**

| धातुः | क्त | क्तवतु | कृत्याः | शतृ-शानच् |
|---|---|---|---|---|
| नी – नय् (1 उ.प) | नीतः | ________ | ________ | नयन्/नयमानः |
| प्र + विश् (6 प.प.) | ________ | प्रविष्टवान् | ________ | प्रविशन् |
| वद् (1 प.प) | उदितः | ________ | वदनीयः | ________ |

आ. **निर्दिष्टा: कृती: कुरुत। (5 त: 4)** [12]

1. **योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (5 त: 3)** 3

क. माता ________ (5) मम युतकं प्रक्षालितवती। (आवृत्तिवाचकम्)

ख. भगवता व्यासेन ________ (18) पुराणानि रचितानि। (सङ्ख्यावाचकम्)

ग. भवने मम गृहं ________ (7) तले वर्तते। (क्रमवाचकम्)

घ. साहित्ये ________ (9) रसा: सन्ति। (सङ्ख्यावाचकम्)

च. आर्यभट्ट: इति भारतवर्षेण प्रेषित: ________ (1) उपग्रह:। (क्रमवाचकम्)

2. **समस्तपदानां तालिकापूर्तिं कुरुत। (5 त: 3)** 3

| | समस्तपदम् | विग्रह: | समासनाम |
|---|---|---|---|
| क. | मृगशृगालौ | ________________ | इतरेतर-द्वन्द्व:। |
| ख. | ________________ | अश्मन: खण्ड:। | षष्ठी-तत्पुरुष:। |
| ग. | अनुत्तमानि | ________________ | नञ्-तत्पुरुष:। |
| घ. | महाकाव्यम् | महत् काव्यम्। | ________________ |
| च. | ________________ | निर्गतं धनं यस्मात् स:। | बहुव्रीहि:। |

3. **समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत। (5 त: 3)** 3

क. नदी = ________________। ख. प्रभूतम् × ________________।

ग. नक्र: = ________________। घ. विद्वान् × ________________।

च. माता = ________________।

4. **सूचनानुसारं कृती: कुरुत। (5 त: 3)** 3

क. महर्षिणा परमाणो: व्याख्या कृता। (वाच्यपरिवर्तनं कुरुत।)

ख. स: महोदयम् उपगम्य वदति। (ल्यबन्तं निष्कासयत।)

ग. जना: वन्यपशून् द्रष्टुम् आगच्छन्ति स्म। ('स्म' निष्कासयत।)

घ. त्वं पत्रं लिख। ('त्वं' स्थाने 'भवान्' योजयत।)

च. जटायु: रावणस्य गात्रे व्रणान् चकार। (वाक्यं लङ्-लकारे परिवर्तयत।)

COEPian's ACADEMY™
We are a 'class' apart...

5. **वाक्यं शुद्धं कुरुत। (5 त: 3)** 3

क. शुक: दाडिमफलानि खादन्ति। ख. गणेशम् नम:।

ग. त्वं भोजनं करोमि। घ. भारतदेशे रमणीयं स्थलानि सन्ति।

च. गृहं समीपे वाचनालय: वर्तते।

## षष्ठ: विभाग:- अपठितम्।

(8)

6. अ. **गद्यांशं पठित्वा कृती: कुरुत। (6 त: 4)** [4]

सुनीता अनीता च माधवदासस्य द्वे कन्ये। सुनीताया: पति: मालाकार: तथा अनीताया: पति: कुम्भकार:। एकदा सुनीता पितरम् अवदत्, "तात, प्रभूतं पर्जन्य: वर्षतु इति मे इच्छा। येन अस्माकं वनस्पतय: पर्याप्तं जलं प्राप्स्यन्ति। तच्छुत्वा समीपे उपविष्टा अनीता सत्वरम् अवदत्," न न। तात। अहं तु चण्डातपं कामये। येन अस्माकं मृद्घटा: सुरक्षिता: स्यु:। उभयो: कामनाम् आकर्ण्य माधवदास: मनसि अवदत्, "किमहं वदाम्यत्र?"

1. **पूर्णवाक्येन उत्तरत।** 1

कस्या: पति: मालाकार: ?

2. **प्रातिपदिकं लिखत।** 1

क. कामनाम् ख. अस्माकम्।

3. **वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

एकदा सुनीता मातरम् अवदत्।

4. **माध्यमभाषया सरलार्थं लिखत।** 1

“प्रभूतं पर्जन्यः वर्षतु इति मे इच्छा।”

5. **गद्यांशात् एकम् अव्ययं चित्वा लिखत।** 1

6. **कारकपरिचयं कुरुत।** 1

अहं तु चण्डातपं कामये।

आ. 1. **पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** [2]

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषाः इव।।

1. **पूर्णवाक्येन उत्तरत। (2 तः 1)** 1

क. वृक्षाः कुत्र तिष्ठन्ति ? ख. के सत्पुरुषाः इव ?

2. **समानार्थकं शब्दं लिखत।** 1

सत्पुरुषः =

आ. 2. **पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** 2

षड् दोषाः पुरुषेण इह हातव्याः भूतिम् इच्छता।
निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता।।

COEPian's ACADEMY™
We are a 'class' apart...

